# 2023

## SANSKRIT — GENERAL

**Paper : GE/CC-3**

**Full Marks : 65**

MURALIDHAR GIRLS' COLLEGE LIBRARY

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I**

**(Marks : 25)**

1\. (a) अधोलिखितयो***रेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ii) विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥

(b) अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरलिपिमाश्रित्य लेखनीया। 5×2
नान्दी, कुलपतिः, अनसूया, सोमतीर्थः, वैखानसः।

(c) प्रसङ्गनिर्देशपूर्वकं ***कस्यैकस्य*** सुरगिरा व्याख्या कार्या। 6×1

(i) गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥

(ii) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

(d) (i) विग्रहवाक्यमुल्लिख्य ***कस्यैकस्य*** समासनाम लेखनीयम् (संस्कृतभाषया देवनागरलिप्या च)। 2×1
अनन्यमानसा 1.(a)(ii) प्रश्ने, तपोधनम् 1.(a)(ii) प्रश्ने।

(ii) निम्नलिखितयोः ***कस्यैकस्य*** सन्धिविच्छेदः करणीयः (संस्कृतभाषया देवनागरलिप्या च)। 1×1
सरसिजमनुविद्धम् 1.(a)(i) प्रश्ने, तामद्य 1.(c)(ii) प्रश्ने।

Please Turn Over

(iii) निम्नलिखितयोः ***कस्यैकस्य*** व्युत्पत्तिनिर्णयं कुरु (संस्कृतभाषया देवनागरलिप्या च)। 1×1

प्रमत्तः 1.(a)(ii) प्रश्ने, संप्रेष्य 1.(c)(ii) प्रश्ने।

MURALIDHAR GIRLS' COLLEGE LIBRARY

**Section - B**

**Unit - I**

**(Marks : 15)**

**2.** (a) अभिज्ञानशकुन्तलनाटके हंसपदिकायाः गीतं कस्मिन्नङ्के वर्तते? का आसीद् हंसपदिका? तस्याः संगीतस्य कोऽर्थः? नाटके गीतस्यास्य उपयोगः वैशद्येन लिख्यताम्। 1+1+2+6

***अथवा,***

अभिज्ञानशकुन्तलनाटके कस्मिन्नङ्के धीवरोपाख्यानं समवतारितम्? अनेनोपाख्यानेन नाटकीयं किमपि तात्पर्यं साधितं न वेति आलोच्यताम्। 1+9

(b) अधोलिखितयो***रेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः॥

(ii) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम्।
असन्निवृत्तै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

**Section - C**

**Unit - II**

**(Marks : 10)**

**3.** अधोलिखितेषु कस्यापि ***द्वयस्य*** टीका संस्कृतभाषया देवनागरलिपिमाश्रित्य लेखनीया॥ 5×2

विष्कम्भकः, भरतवाक्यम्, प्रवेशकः, अङ्कः।

**Section - D**

**Unit - II**

**(Marks : 15)**

**4.** अधोलिखितेषु कस्यापि ***द्वयस्य*** टीका लेखनीया। 5×2

भवभूतिः, विशाखदत्तः, रघुवंशम्, रत्नावली।

5. अधोलिखितेषु ***पञ्चानां*** प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्। 1×5

(a) उत्तररामचरिते प्रधानरसः कः?

(b) मृच्छकटिकम् इति दृश्यकाव्ये नायिका का?

(c) मालतीमाधवनाटकस्य नायकः कः?

(d) अभिज्ञानशकुन्तलनाटके कति अङ्काः सन्ति?

(e) कर्पूरमञ्जरी केन विरचिता?

(f) स्वप्नवासवदत्तनाटके मन्त्रिणः नाम किम्?

(g) नागानन्दनाट्यकृतौ कति अङ्काः सन्ति?

MURALIDHAR GIRLS' COLLEGE
LIBRARY

---